केरळविश्वविद्यालयः

अनन्तशयनसंस्कृतग्रन्थावलिः

ग्रन्थाङ्कः — १९९

श्रीकृष्णलीलाशुकमुनिप्रणीतं

कालवधकाव्यम्

प्रकाशकः

डाक्टर्. के. राघवन् पिळ्ळ

पौरस्त्यग्रन्थप्रकाशनकार्यालयाध्यक्षः ।

अनन्तशयने एस्. वी. जी. मुद्रणालये मुद्रितम् ।

१९६२/११३७

S. E. 1883

मूल्यं रूप्यकमेकम्

INTRODUCTION

[KĀLAVADHA KĀVYAM]

This work was first published in the Journal of the Kerala University Oriental Manuscripts Library Vol. X, No. 3. Its publication is based on a manuscript No. 17598 (I) of Kāṭṭumāṭam Mana.

It is a Kāvya in 3 cantos. The story is the slaying of the Lord of Death by Śiva, who is resident in Śvetavanam (Tṛpparaṅgode) in the form of the Linga. Śiva is described as being in the company of Viṣṇu, Pārvati and the Gaṇas. When he was thus being praised and worshipped he heard the cry of Mārkaṇḍeya who was the son of the sage, Mṛkaṇḍu. The young boy on whom there was the destiny of an early death was performing penance of Śiva in order to avoid his sad destiny. However, Death approached him and he was crying out for help from Śiva. Hearing this the Lord Śiva went forward with Viṣṇu and the Gaṇas and killed Death ie., Kāla. The life of the youug ascetic was thus saved. At that time Mārkaṇḍeya observed that Śiva and Viṣṇu were in company and he praised both. As a result of this, he got a momentary vision of the integration of Śiva and Viṣṇu in the supreme non-dualistic

form (Advaita). This vision however soon gave way to the vision of duality, that is, the vision of the separate existence of Śiva and Viṣṇu. Mārkaṇḍeya, who saw both these realities ie., the reality of oneness and the reality of duality entered cosmic bliss in that supreme realization and Śiva in accordance with the wishes of the sage decided to stay in Śvetavanam in the form of the Linga.

The poet has adopted an interesting method in introducing the story. Kṛṣṇa and the cowherds who were residents of Śvetavanam and were devotees of Śiva had a vision of God Śiva. The cowherds bowed their heads and clasped their hands in salutation of Śiva. Kṛṣṇa then told Śiva that they had deen greatly gratified by their worship of the Lord and in his giving them a vision of himself. They would be very happy, he added, if he would also bless them with his speech. Listening to this, Śiva smiled within himself as he knew that Kṛṣṇa was speaking those words not for himself but for the benefit of the cowherds who were with him. Then he started to narrate to them the story of how he saved the life of the son of Mṛkaṇḍu from the clutches of Death.[1]

The author of this work is the celebrated poet

---

1. See Kālavadha Sarga I. st. 1 to 3. Krishnamachari in his History of Sanskrit Literature (p. 336) describes the story as narrated by Kṛṣṇa to the Gopis. This is not correct.

Līlāśuka to whose credit there are a number of works. His known works are the following:-

1. Śrīkṛṣṇakarṇāmṛtam
2. Śrīcihnam or Govindābhiṣekam (a Prākṛta Kāvya illustrating Prākṛt Grammar)
3. Puruṣakāram, a commentary on a grammatical work by Deva. (T. S. S. No. 1)
4. Abhinavakaustubhamālā (T. S. S. No. 2)
5. Dakṣiṇāmūrtistavam
6. Durgāstuti
7. Bālakṛṣṇa stotram
8. Bālagōpālastuti
9. Bhāvanāmukuram
10. Rāmacandrāṣṭakam
11. Ganapatistotram
12. Anubhavāṣṭakam
13. Mahākālāṣṭakam
14. Kārkoṭakastotram
15. Śrikṛṣṇavaradāṣṭakam
16. Vṛndāvanastotram
17. Kṛṣnalīlavinodam - a commentary on Bhoja's Sarasvatīkanṭhabharana Grammar)
18. Śaṅkarahṛdayaṅgamam
19. Subantasāmrājyam - a work on Sanskrit Grammar
20. Tiṅantasāmrājyam - a work on Sanskrit Grammar
21. Kramadīpikā
22. Kālavadham – a laghukāvya.

Of the stotras of Kṛṣṇalīlāśuka we have ourselves published in our Journal the Adbhutastuti, Vṛndāvana Stuti, Tribhuvanasubhagāstuti (Dakṣiṇāmūrti stava) the Kaustubhamālāstotram, (Abhinavkaustubhamālā) Sarasvatīnakṣatramālāstava and Nṛsimhanavaratnastotra.

Kṛṣnlīlāśuka was a son of Kerala[1] His mother's name was Nīli and father's name was Dāmodara He was a pupil of Īśānadeva, the author of Tantrapaddhati[2] He had also another teacher by name Somagiri[3]

---

1. There are, however, claims that he belonged to other areas in India with traditions to support them. Bengal and Orissa and the Circars claim him. (See History of Classical Sanskrit Literature by M. Krishnamachariar: P. 335). Howevex, the tradition that he founded the Naṯuvile Maṯham (Mutt) at Trichur disproves contentions of his non-Kerala nativity. All the heads of Naṯuvile Maṯham are known as Vilvamangalam Svāmiār. the name of Līlāśuka as an ascetic.

2. *See stanza in Srīkṛṣṇakarṇāmṛta:*

ईशानदेवचरणाभरणेन नीली-
दामोदरस्थिरयशःस्तबकोद्गमेन ।
लीलाशुकेन रचितं तव देव ! कृष्ण-
कर्णामृतं वहतु कल्पशतान्तरेऽपि ॥

The Tantrapaddhati was published in T. S. S. in 4 parts.

3.

चिन्तामणिर्जयति सोमगिरिर्गुरुर्मे
शिक्षागुरुश्च भगवान् शिखिपिञ्छमौलिः ।

He was a devotee of God Mṛtyuñjaya of Śvetavanakṣetra (Tṛpparaṅgoḍ) other-wise known as Dakṣiṇakailāsam. He lived at Muktisthala, now known as Mukkuttalai, or Mukkavalai in Malabar on the banks of the river Bhārati .

Kṛṣṇalīlāśuka was a great devotee of Śrīkṛṣṇa and it is said that he went into trance while singing in praise of Kṛṣṇa,

Kṛṣṇalīlāśuka became well-known as the saint Bilvamaṅgala, whose passion for Kṛṣṇa was known to the world of devotees all over India. Bilvamaṅgala founded the Naṭuvile Maṭham of Trichur. The heads of the Mutt are known as Bilvamaṅgala. There is also a tradition which connects the names Bilvamaṅgala, Bilhaṇa, Jayadeva and Mādhavānala. We may quote here a passage from Śeṣagiri Śāstri's Reports quoted by Krishnamachari in his History of Classical Sanskrit Literature.[4] The passage reads as follows:- "In Gaḍa's Sam-

---

(Note continued from previous page)---

The word Cintāmaṇi which occurs in this line reminds one of the courtezan Cintāmaṇi who was in a sense a teacher of Līlāśuka in that she diverted the course of his life from sensuous to spiritual objectives, It is said that his intense attachment for her made her advise him to turn his emotions more profitably towards Kṛṣṇa. This opened the eyes of the thoughtless man and he turned a new leaf in his life.

4: History of Classical Sanskrit Literature. p. 335.

pradāyakuladīpika it is said "There were some devotees one named Bilvamaṅgala in the Tamil country, another at Banares and the third in Orissa. There is a stotra containing 108 stanzas composed by him. All of them were Vaiṣṇavas. The person who was born at Kāśi was in his first life known by the name Mādhavānala, in the second Bilhaṇa, in the third Bilvamaṅgala and in the fourth Jayadeva who composed the Gītagovinda. When Bilvamaṅgala was spreading the religion of Viṣṇu swāmi he got many desciples." While the value of such legends of re-birth and the like as data for history is not much, the passage under reference does give valuable evidence of the evaluation of Bilvamaṅgala as a great figure in the Vaiṣṇavite tradition.

Kṛṣṇalīlāśuka was a gifted poet. His talent for pithy description and communication of sentiment is evident in the Kṛṣṇakarṇāmṛta and his other lyrical works in praise of Gods and Goddesses.

Kṛṣṇalīlāśuka was not merely a poet. He was a grammarian and a philosopher of distinction. His works on Sanskrit and Prākṛt grammars have already been mentioned above and we have publishep his Puruṣakāra— a commentary on Daiva, a work in Sanskrit grammar as No. 1 in the Trivandrnm Sanskrit Series His 'Govindābhiṣekam' is a Prākṛt kāvya illustrating the rules of Vararuci's Prākṛtaprakāśa.

A word need to be said here on Kṛṣṇalīlāśuka as a philosopher. His intense devotion to Kṛṣṇa is a legend in Kerala, as well as in other parts of India. However, it seems from his Kālavadha and other works that he was also a great devotee of Śiva. We have noted earlier in this Introduction how in the Kālavadha Kāvya, the poet has worked out a synthesis of the Śiva and Kṛṣṇa concepts. Mārkaṇḍeya saved from the clutches of death by Śiva has for a moment the vision of the fusion of Śiva and Viṣṇu into a non-dual reality, to be soon separated into the distinct personalities of Śiva and Viṣṇu again. The fact that Līlāśuka has written works both in praise of Kṛṣṇa and Śiva coupled with this interesting study of the description of a merger of the Śiva-Viṣṇu forms and concepts as a unity shows, I believe, that, while Līlaśuka was a great Vaiṣṇavite, his mind also conceived a larger synthesis leading to the grand concept of non-duality. The poet himself writes in the Kṛṣṇakarṇāmṛta that he was a Śaivite who conceived an intense devotion for Kṛṣṇa[5]

MM. T. Ganapati Sastri who edited Līlāśuka's Puruṣakāra published in T. S. S., discussing the date of the author arrived at the conclusion that our poet-

---

5. शैवा वयं न खलु तत्र विचारणीयं
पञ्चाक्षरीजपपरा नितरां तथापि ।
चेतो मदीयमतसीकुसुमावभासं
स्मेराननं स्मरति गोपवधूकिशोरम् ॥

grammarian-philosopher lived in the 13th century A. D. He based his conclusion on the textual evidence that Sāyaṇācārya who is believed to have lived in the middle of the 14th century refers to Kṛṣṇalīlāśuka's Puruṣakāra, and that there is reference to Hemacandra of the middle of the 12th century, in the Puruṣakāra.

Farquhar's[6] arguments to place the poet in the 15th century are not convincing. The Puruṣakāra is quoted by Sāyaṇācārya.

The date given by MM. Ganapati Sastri is accepted by us.

Research Officer Sri. A. Ramachandra Sastri, and Assistant Research Officer Sri. M. Madhavan Unni assisted me in the publication of this work.

Trivandrum
27-12-1961

K. RAGHAVAN PILLAI
CURATOR

6. *Farquhar -- Outlines of the Religious Literatures of India-- p. 304.*

॥ श्रीः ॥

श्रीकृष्णलीलाशुकप्रणीतं

कालवधकाव्यम् ।

प्रथमः सर्गः ।

शैलेन्द्रमूर्धनि धृताद्भुतदिव्यवेषं
देवं विलोक्य निखिलव्रजफालरत्नम् ।
पप्रच्छ विस्मयरसेन परीतचेता
बद्धाञ्जलौ व्रजजने स्वयमेव कृष्णः ॥ १ ॥

देव ! त्वदर्चनकृतीकृतजन्मनां नः
प्रापुः समस्तविषयीणि कृतार्थभावम् ।
किन्तु त्वदीयवदनाम्बुजदिव्यवाणी-
मत्यद्भुतामनुबुभूषुरलं जनोऽयम् ॥ २ ॥

इत्यात्मना निगदितं सकलव्रजानां
विस्मापनाय वचनामृतमाकलय्य ।
अन्तर्निगूढहसितेन जगत्त्रयस्य
नाथेन निर्मितमिदं श्रवणामृतं तत् ॥ ३ ॥

मन्दस्मितस्नपितमुग्धमुखारविन्दं
मन्दानिलाकुलितकोमलकाकपक्षम् ।
अङ्गं तदेतदखिलव्रजलोचनानां
मङ्गल्यमस्तु किमतः परमस्ति कृत्यम् ॥ ४ ॥

दिङ्छावतंसरचनोचितकेशपाशं
पीनस्तनीनयनपङ्कजलोभनीयम् ।
मन्दारवर्षभरितं सुरसुन्दरीभि-
र्मन्दं मृदुक्कणितवेणुरसाभिरामम् ॥ ५ ॥

किश्चेदमद्भुतरसं चरितं पुरारेः
शृण्वन्तु हन्त मधुकैटभविद्विषश्च ।
सर्वेऽपि घोषनिलयाः सह बालवर्गै-
र्नत्वासिताय च सिताय च दिव्यधाम्ने ॥ ६ ॥

ईशः कदाचिदचलेन्द्रमहासभायां
गीर्वाणमौलिमणिमेदुरवेदिकायाम् ।
सख्या सहैव सरसीरुहलोचनेन
तत्तत्स्तुतीरनुभवन् जनमन्वगृह्णात् ॥ ७ ॥

मन्दस्मितद्युतिशतप्रचयप्रचारै-
र्मौलीन्दुदीधितिविलासविहासदक्षैः ।
आरञ्जयन्निव मृजन्निव दिग्विभागा-
नालोभयन्निव हरन्निव देवदृष्टीः ॥ ८ ॥

निस्सारयन् विलसितैः स्मरदाहवार्तां
सेवाविलासमयलास्यरसज्ञवर्गम् ।
नर्मोक्तिभिः प्रमदयन् नलिनारुणाक्ष-
मालोकयन् गिरिसुताननमन्तराले ॥ ९ ॥

तत्तत्तथाविधमहोत्सवमण्डितायां
सेवानतैर्दिविषदां निकरैः सदस्याम् ।
आविर्बभूव किमपि ध्वनितं सुदूरा-
दप्यैश्वरं हृदयमाचलयत् क्षणेन ॥ १० ॥

स्थित्वा मुहूर्तमचलेक्षणमम्बुजाक्ष-
वामांसकूटतटलग्नमपावरोप्य ।
पाणिं निजं पुरग्पुिः परिवारराजं
साङ्गं सरोषमिव नन्दिनमन्वपश्यत् ॥ ११ ॥

सोऽपि स्वयं सपदि दूरतरोऽभ्युपागात्
प्रौढप्रणामनिपुणाञ्जलिमञ्जुमौलिः ।
आज्ञापयन्ति किमु दासजनाय देव-
दिव्येक्षणानि लसितान्यधुनेति वादी ॥ १२ ॥

रोषाङ्कुराङ्कितमनङ्गरिपोर्ललाट-
मालोक्य किं किमिदमित्यलमुत्सुकानाम् ।
विस्रम्भतो गतभियामपि देवतानां
सद्यो मनांसि सहसाध्वसतामवापुः ॥ १३ ॥

भक्तैकवश्य! भवदीयपदारविन्द-
रागारुणामलमतीनपि दासवर्गान् ।
आहन्तु हन्त हतकः किमकालकालः
कामान्तकेति विनिशम्य विभुश्चचाल ॥ १४ ॥

तस्मिन् स्फुटातिविकटभ्रुकुटीकुटीभि -
र्लोटल्ललाटतटलोठिनि कालकण्ठे ।
ईदृग्विधैरलमलं रुषितप्रचारैः
कालोऽणकः किल कियानिति कृष्ण ऊचे ॥ १५ ॥

ज्ञात्वा निमित्तमथ रोषविजृम्भणस्य
स्वात्मापराधपरिशङ्कि मनो विहाय ।
ईषद्धरं हरबलेन विचिन्त्य काल-
माश्वस्य वाक्यमिदमाह ततः स नन्दी ॥ १६ ॥

तं सर्वलोकजयिनं मदनं नवेन
नेत्राग्निलेशविभवेन तथाकरोद् यः ।
तस्य प्रभोः पुरहरस्य पुरः सहायाः
सन्तः पुनीत निजबाहुबलं सुरेन्द्राः ॥ १७ ॥

नन्द्यादयाथ निखिलैरपि लेखवर्गै-
र्देवौ प्रणम्य सहसा धृतहेतिजातैः ।
ताभ्यां सहैव चलितं विजयाय शत्रोः
श्रीकण्ठदासजनधर्षणदूषितस्य ॥ १८ ॥

त्रायस्व चन्द्रतिलकेत्यसकृन्निनाद-
मार्ताननोद्गतमनीचतमं निशम्य ।
हा हा धिगेवमतिमन्थरगामिनोऽस्मा-
न्नित्याजगर्ज स जनोऽतिमनोजवोऽपि ॥ १९ ॥

तामेव शब्दपदवीमनुसृत्य सर्वे
गीर्वाणवीरवृषभाः सह नायकाभ्याम् ।
अन्योन्यघट्टितरवैर्निजवाहनाना-
माभीषयन् जलधरान् गगने चरन्तः ॥ २० ॥

सा वाहिनी सपदि वैरिपुरःप्रदेशं
प्राप्ता वितत्य परितोऽपि शरप्रवाहान् ।
तिष्ठ प्रदर्शय भुजं समरप्रियाणा-
मेषामलं खलु मुनौ तव तेजसेति ॥ २२ ॥

कालोऽपि कालकुटिलाग्रविषाणकोटि-
काठोर्यकातरितयोगिनि कासरेन्द्रे ।
प्रत्यन्तदन्तपरिपातिविजिह्मजिह्वा-
लेलिह्यमानरिपुलोहितभाजि रेजे ॥ २२ ॥

सम्मन्यते स्म स दृशापि न तीक्ष्णधारा-
निष्ठ्युतनिष्ठुरशिखानलचक्रपाणिम् ।
भूयस्तरां अमितभीषणचक्रहस्तं
क्रोधे(न) शूलकलिताग्रकरं हरं वा ॥ २३ ॥

तस्येक्षणे विजलकूपसहायवेषे
प्रामोचि कोऽपि विशिखः शि(खि)वाहनेन ।
सद्यः समुद्गतजपारुणशोणिताम्भः-
पूरेण पूर्णमवलोक्य चिरं व्यहासि ॥ २४ ॥

तत्कालमेव गुरुवेगसमुद्गमद्भि-
र्बाष्पाम्बुभिर्महिषलोचनगर्तयुग्मम् ।
रेजे कुमार किमिदं कलुषाम्भसा ते
गृह्णीष्व शुभ्रजलमेतदितीव पूर्णम् ॥ २५ ॥

मृत्युः पुनः परिविसृज्य निजेक्षणं तद्
बालोऽसि हन्त! सदृशो न हि मादृशानाम् ।
अभ्येत्वयं तव पितैकशरावकृत्त-
तादृक्पुरत्रयविजृम्भ इति व्यगर्जत् ॥ २६ ॥

त(स्या?त्रा)वलोक्य तरुणेन्दुकलावतंसं
तस्यान्तिके सरसिजारुणलोचनं च ।
आसीद् द्वितीयमपि नेत्रमदभ्ररोष-
रागत्विषा भरितमन्यदिव क्षणेन ॥ २७ ॥

अत्रान्तरेऽपि रभसं परिवृत्य नन्दी
कण्ठे निजे समनुगृह्य मुनिं तमार्तम् ।
नाथाग्रतोऽभिगतवान् नयनत्रयेण
सम्पूजितः स्मरजिताचितसम्भ्रमेण ॥ २८ ॥

मुक्तः स मृत्युमुखगह्वरतो मृकण्डोः
पुत्रः पुरत्रयजिता निजवाहनार्धे ।
आरोपितः श्रितजने करुणामयेन
सोऽप्यस्य पादकमले प्रणिपत्य तस्थौ ॥ २९ ॥

कालस्तु कोपकलिलाकुललोचनार्क-
कान्त्या जिगाय तटिदाढ्ययुगान्तमेघम् ।
आलोकयच्च निखिलां निजचित्रगुप्त-
गुप्तां चमूं चलकृपाणलताकरालाम् ॥ ३० ॥

क्षिप्तः प्रसार्य शमनेन मुनौ स्वपाशः
क्षोपिष्ठमेत्य चकृषे जहृषे च तेन ।
यस्मिन्नुलूखलविलास इति प्रतेने
स्कन्देन नाम गणपाशशिशौ यथार्थम् ॥ ३१ ॥

लज्जन् न तेन समराय न नोऽममज्ज
मृत्योर्जनः स तु दृढं प्रगृहीतपाशः ।
कालेन यत् खलु पुरा विहितं तदेव
तस्मिन्नयं नमति देष्टुमभीष्टवान् ही ॥ ३२ ॥

आकृष्य धावितुमथारभते स रोषा-
न्मृत्युस्तमस्तबलभङ्गमुदीर्णनादम् ।
तं भूतमेव परिवार्य सहस्रशोऽन्ये
तस्थुर्हरस्य सचिवा हरजानुशिष्टाः ॥ ३३ ॥

उद्गूर्णशस्त्रशतशोभितहारिहस्ता
रोषाभिरूषितकषायविचित्रनेत्राः ।
उन्निद्रकेसरिनिनादविपूरिताशाः
कृष्णं (तथा) यमभटाः प्रमथौघमापुः ॥ ३४ ॥

प्रस्यन्दिताचितमदाम्बुविमर्दकण्डू-
माखण्डितारिजनपाणिरुहैरपास्यन् ।
आलोलगर्वितकराः करिणां निकायाः
कालस्य कौविदनिपादिभिरप्यशोभि ॥ ३५ ॥

तेषां मदान्धुहुहुहेति मुहुः प्रवृद्ध-
सञ्जर्जितानि निखिले गगने विचेरुः ।
भूयो विबाधनिनदैरतिसङ्कटं तत्
सन्त्यज्य दूरमपगन्तुमिवानुसृत्य ॥ ३६ ॥

उन्मुच्यमानमदशीकरवर्षधारै-
रुद्गर्ज्य दिग्गजगणाननुनादयद्भिः ।
हैमीकुथाव्युपगतैर्गगने चरद्भि-
र्विद्युत्वतामिव गणैर्नितरां चकाशे ॥ ३७ ॥

तेषां दिवं सरभसं परितः प्रयाता
सिन्दूरधूलिरधिवायुपथं चचार ।
वीरागमव्यसनतस्त्वरयाभ्युपेताः
सीमन्तिनीर्दिविषदां प्रतिरूपयन्ती ॥ ३८ ॥

सा व्योम्नि हन्त विसृता सकलेऽपि सिक्ता
माद्यत्करीन्द्रकरपूतमदाम्बुवर्षैः ।
व्योमाङ्गणं बत विपिच्छिलमेव जात-
मित्यालपद्भिरमरैरवलोकिताभूत् ॥ ३९ ॥

रेजुर्हया रचिततादृशवेगचारै-
र्वायुं विजेतुमिव वायुपदे प्रविष्टाः ।
हेषाभिरूर्जिततमाभिरुपात्तरोषं
तं भर्त्सयन्तमिव मूर्ध्नि निधाय पादौ ॥ ४० ॥

प्रत्येकमेव गगनं ग्रसितुं समर्था-
न्यत्यायतानि परिणाहधराण्यानि ।
यानानि काञ्चनमयानि विरेजुरेषां
चक्राणि वीक्ष्य निजचक्रमवैन्न चक्री ॥ ४१ ॥

अभ्यायतीमिति चमूमभियातिवर्ग्या-
मङ्गैश्चतुर्भिरभियाति सुरावली स्म ।
न त्वेव जातुचिदवाप ससाध्वसत्वं
वीरे कृतस्थिति भियः खलु साध्वसत्वम् ॥४२॥

अन्योन्यमद्रितटचारुशिलाविशाल-
वक्ष(स्त)टेषु समरास्त्रकिणाकरेषु ।
अभ्यस्यतामसिलता निशितास्तदोर्चे-
रन्तर्न गन्तुमभवन् सहसा समर्थाः ॥ ४३ ॥

बाणैः परस्परपराहतवेगवीर्यैः
सेनान्तरालगगनं परितः पुपूरे ।
तेषां मिथो युधि विलोकनलम्पटानां
प्रत्यूहतां क्षणममी अभजन् भटानाम् ॥ ४४ ॥

शातास्त्रशस्त्रशतजर्जरितैर्द्विपेन्द्रै-
रुत्पादिता रुधिरशैवलिनीप्रवाहाः
स्वर्गापगासलिलसम्भ्रममेव जेतुं
शक्ता नही रिपुवधूनयनाम्बुपातान् ॥ ४५ ॥

युद्धश्रमेण परिकर्शितदर्शनानां
(शा?श्रा)न्ति जहार स(मधि?मिति)प्रम(दा?था)धिपानाम् ।
आलोकितं शशिकलेन्दुदृशा दयार्द्रं
यां योगिनः सकृदवाप्य धु(वन्ति) बन्धम् ॥ ४६ ॥

मुक्त्वा वशं मम कथं विगमो ह्यसूनां
सेनास्विति प्रतिविचिन्त्य यदास्त कालः ।
कामारिसेवकजनेन तदा तदीयं
सैन्यं व्यनीयत विभिद्य सुरेन्द्रपक्षम् ॥४७॥

कालः स्वयं मकरकेतुरिपोः पुरस्ता-
दस्त्रैर्निरस्तगणबाणगणः प्रतस्थे ।
एह्येहि दर्शय तृतीयमहो चतुर्थ-
मक्षीति रूक्षमभिलप्य शरान् मुमोच ॥४८॥

तान् मुञ्चतः सरभसं पुरशासनाय
तस्याभवन्निषुधयः खलु भूतपूर्वाः ।
ज्ञात्वेव तत् सकलवित् स तु तान् समस्तां-
स्तस्मै मृधोत्सुकतया धनुषा दिदेश ॥४९॥

तीक्ष्णात्मकाः परिचलाः स्वयमेधिता ये
स(त्वं न? त्वेन) ते न वितुदन्ति परप्रयुक्ताः ।
कालं तथा (हि?पि) विभुचापगुणप्रयुक्ताः
सम्प्राहरन्त परितो निजबाणवीराः ॥५०॥

दण्डं निजं पुरहरस्य पुरः प्रयोक्तु-
माशङ्कते स्म शरनीतिमनुस्मृतोऽसौ ।
कोपादथापि मुमुचे तमथान्तराले
पाणावुपादित निजे कलदण्डपाणिः ॥५१॥

दण्डोद्यतं तं परितश्चरन्तं
निजं गणो वीक्ष्य मृधाङ्कणेषु ।
क्षणं क्षणोत्प्रेष मृधे यु—स्मान्
कालः किलेत्याशयसंशयोऽभूत् ॥५२॥

हरशूलशक्तिमभिनन्द्य मन्दिरं
निजमाग(तां?तं) यमहृदय्यतेजसा ।
शिवदिव्यदेहमनु संशये क्षणा-
दखिलामरर्षिनिचयाक्षिसाक्षिणा ॥ ५२ ॥

इति श्रीकृष्णलीलाशुकस्य कृतौ कालवधे
प्रथमः सर्गः ॥

अथ द्वितीयः सर्गः ।

इति चित्रमश्रमनिकृत्तशात्रवं
शशिमौलिमेत्य शतपत्रलोचनः ।
परि(र)भ्य गाढमथ हर्षवारिभि-
र्ललिते निजेक्षणयुगे क्षणं दधे ॥ १ ॥

पुलकोद्गमेन पुरुणा परिष्कृतं
परमेश्वरस्य परमः पुमान् वपुः ।
अधिरूढहर्षमवलोक्य सादरं
प्रशशंस स्मरण्यपरतन्त्रमानसः ॥ २ ॥

इदमादिदेव! न परेण चेतसा-
  प्यधिगम्यमीश! किमुतातिविक्रमैः ।
अथवा कियन्नु तव कालकर्शनं
  सकलं जगत् सपदि संहरिष्यतः ॥ ३ ॥

पुरमर्दने खलु पुरा ह तादृशं
  तव वापदानमिति दानवद्विषः ।
परिहर्षफुल्लनयना विनिश्चिता-
  स्तदिहाधुनावसितमेव मन्वते ॥ ४ ॥

तव दिव्यपाणिपरिपूतनिर्लस-
  च्छितशूललूननिजकायबन्धनः ।
शमनोऽयमस्तशमनां गतिं गतो
  नहि निग्रहो ह्ययमनुग्रहः परम् ॥ ५ ॥

पुरदानवेन्द्रतनुभूतिविभ्रमा-
  नधुनापि दिव्यवपुषा दधासि यत् ।
ननु लोकवल्लभ! तदेव ते पुनः
  परिकीर्तयत्यलमनुग्रहं जने ॥ ६ ॥

न तथाद्भुतं तव ललाटलोचनं
  सुचिरं विचार्य परिचिन्तयामहे ।
यदिदं विभावसुशिखैकविग्रहं
  परिशीतयत्याखिलमेतदद्भुतम् ॥ ७ ॥

त्रसति प्रिया तव गलानुचुम्बितं
  बत कालकूटमिति कूटवार्तया ।
यदिदं लसत्कुवलयोदरद्युते-
  र्निजनेत्रपातललितस्य जृम्भितम् ॥ ८ ॥

कथमन्यथा यदि (च दि)व्ययोगिनां
हृदयावलिः स्फुटमिहैव दीव्यती ।
विजहाति मोहमुपयाति तादृशं
कमपि प्रबोधनविलासविभ्रमम् । ॥ ९ ॥

मलयानिलावधुतजाह्नवीजलै-
र्गिरिजावलोकनभयातुरैरिव ।
गुरुनीरजन्ममकरन्दचन्द्रकै-
रभिषिच्यसे रणपरिक्लमच्छिदे ॥ १० ॥

परिरब्धसौरतरुसूनमञ्जरि-
र्व्यवगाहितामरसरित्तटान्तरः ।
गुरुगन्धभारत इवातिमन्थरः
पुरतः समीरणरसः ससेति ते ॥ ११ ॥

अमुना न तादृगनिशं सुखात्मन-
स्तव कल्पते रतिरनल्पकान्तिना ।
प्रमदप्रनृत्तवनिताहृतां यथा
निजभूषणीयफणिनां ससम्भ्रमम् (?) ॥ १२ ॥

तव शोभते रिपुजरक्तबिन्दुभी
रणसम्भ्रमेण कृतसङ्क्रमैर्वपुः ।
इह यत्र घर्मजलजालकानि भा-
न्त्यनु पद्मरागमिव मौक्तिकान्यहो ॥ १३ ॥

तव पादपद्मयुगलैकसेवन-
व्रततन्त्रता विमलयोगिनां फलम् ।
कितवं तु हन्त किमितीव मौलिना
दधसे सदापि किमिद त्वदीहितम् ॥ १४ ॥

अणु वा तवास्तु महदेव वा वपु-
  र्निजचित्तविभ्रमरसानुसारिणाम् ।
अपि तु त्वदीयमविखण्डितं पदं
  कतिचिद् वदन्ति कवयः पुरातनाः ॥१५॥

इति सख्युरक्षतवचस्सुधारसं
  परिचुम्ब्य विस्मृतरुषारसान्तरः ।
अनुरागसान्द्रमनुसङ्गतस्मितं
  सुरमण्डलीं सुरपतिर्व्यलोकयत् ॥१६॥

अथ सुप्रसन्नहृदये जगत्पता-
  वविराममच्युतविलोकनोद्यते ।
विपुलप्र(फु)ल्लनयनाः सरस्वती-
  मिति देवता निजगदुः सुधामयीम् ॥१७॥

युवयोः परं किल पदं गुहाशयं
  मुनयो गृणन्तु निजभावभूषणाः ।
अविभिन्नयोरपि भिदामुपेयुषो-
  रपरेऽपि धामनि वयं तु बालिशाः ॥१८॥

अथ गाढमश्रुतचरीर्गिरः परं
  विनिशम्य नः प्रघहतं प्रसन्नताम् ।
निजकौतुकेन चलितान्तरा वयं
  नहि जोषमेव भवितुं क्षमामहे ॥१९॥

यत एतदाविरभवज्जगत्त्रयं
  परिपालितं लसति येन तेजसा ।
अपि यत्र निर्वृतिमुपैति मायया
  तदिदं द्विधाकृतमहो निजेच्छया ॥२०॥

मदनाङ्गभाङ्गिनयनाय ते नमो
मदनाङ्गसङ्गिनयनाय ते नमः ।
परिपाटितान्धकजनाय ते नमः
परिपालितान्धकजनाय ते नमः ॥२१॥

पशुमोचनैकनिरताय ते नमः
पशुपालनैकनिरताय ते नमः ।
गुरुशैलवन्दनपराय ते नमो
गुरुशैलचालनपराय ते नमः ॥२२॥

कुमुदोदयश्रुतिमयाय ते नमः
... ... ।
भुवनोपसंहृतिसखाय ते नमो
भुवनोपसंहृतिसखाय ते नमः ॥२३॥

इति मण्डले स्तुवति नाकपालिनां
श्रुतिमण्डनाय युगलस्य तेजसोः ।
सुरसिद्धचारणविलासिनीलता-
करपल्लवेषु कुसुमानि रेजिरे ॥२४॥

अथ तान्यघोषत भृशं महाफलं
सपदि स्वयं त्रिषु जगत्सु दुर्लभम् ।
यदमीभिरद्भुतसमृद्धसौरभै-
र्ययतुः प्रसादमखिलेश्वरेश्वरौ ॥२५॥

अपि तेषु लोलुपतयेव मन्थरः
पवनश्चचार विनिगूढचापलः ।
अपि च प्रसङ्गमुपजीव्य तत्क्षणं
कुसुमेषुरेभिरुद-न्थ मानिनीः ॥२६॥

अधिलास्यमुल्लसितमप्सरोगणै-
रभिकालवैरि विलसद्विलोचनैः ।
नयनाग्निदग्धवपुषा मनोभुवा
नियतं प्रसादयितुमेव चोदितैः ॥ २७ ॥

मणिकोणताडितसुरेन्द्रदुन्दुभे-
र्विलसद्गभीरतरभाङ्कृतिस्वनैः ।
ककुभाकरीन्द्रनिजकर्णनिर्गतैः
कुलशैलकन्दरदरीषु बभ्रमे ॥ २८ ॥

महसोः प्रसादनपरेण चेतसा
गणितेव लासकपदं सुरावलिः ।
अचलानि यानि च मनांसि योगिना-
मपि तानि लास्यमभजन्त भक्तितः ॥ २९ ॥

लोचनैरुभयदिव्यविग्रह-
व्यापृतव्यतिकरेऽनुरज्यतः ।
वज्रिणः पदमभीप्सवोऽपि ही
नापराधपदवीं गताः सुराः ॥ ३० ॥

बालचामरकराः सुराङ्गना
मारुतस्य चिरमीप्सितं द(धुः?दुः) ।
येन सोऽयमखिलेन्द्रविग्रहा-
वालिलिङ्ग नवरोमविक्रियौ ॥ ३१ ॥

मन्द्रमिन्द्रजलदा निनादिनो
मन्दवर्षमवहन् सुधारसैः ।
चन्दनद्रवमयेन वारिणा
चन्द्रचूडमपरे ह्यपूजयन् ॥ ३२ ॥

सम्भ्रमोत्तरतरं सपर्यया:(?)
सज्जनाः सकललोकवल्लभौ ।
सुप्रसादसुमुखौ परस्परा-
लोकनेन परिवव्रुरादृतौ ॥ ३३ ॥

नृत्यति प्रथमयोषितां गणे
द्वैधमुत्(स)वरसो दशामभूत् ।
शङ्कते मम तु हन्त मानसं
शङ्करादचलदद्रिजेक्षणम् ॥ ३४ ॥

शरणमुपसमेतैश्चन्द्रगङ्गोरगाद्यैः
समभिरुचितदेशे शोभिभिः सेव्यमानः ।
जलदमधुरधाम्ना रत्नभूषामयेना-
प्यपरवपुरशोभीद(भ्य?भ्यु)पेतः शिवाब्धिः ॥ ३४ ॥

इति श्रीकृष्णलीलाशुकस्य कृतौ कालवधे
द्वितीयः सर्गः ॥

अथ तृतीयः सर्गः ।

अखिलमुनिजनानामन्तरन्वेषणीयं
निखिलनिगमवाचां विभ्रमैर्लक्षणीयम् ।
नयनपथमुपेतं मङ्गलानन्दपूरं
सपदि तमनुभूय व्याजिगीषन्मुनीन्द्रः ॥ १ ॥

वृष इति निजसंज्ञां बिभ्रतः पुण्यराशेः
श्रुतिनिकरगिरां वा पक्षपातं गतानाम् ।
अनिशमनुपुनन्तं पार्श्वपक्षप्रदेशान्
ललितचरणपद्मामर्शनीलाविहारैः ॥ २ ॥

फणिफणमणिलक्ष्मीपुञ्जमञ्जूकृतेन
प्रतिभयलालिताङ्गं दन्तिचर्माम्बरेण ।
मधुरममरनारीमन्थरापाङ्गलीला-
व्यतिलुठितविहारागारपीताम्बरेण ॥ ३ ॥

गिरिचरनिजकन्यालोचनच्छायपूरै-
रपि च भुजगहारैरादृतं बाहुमध्ये ।
निचितमुरसि लक्ष्म्या दिव्यलीलारविन्दै-
रविरतवनमालाषट्पदान् वारयन्त्या ॥ ४ ॥

वृषभककुदकूटे शैलकन्याकुचान्ते
मुनिशिरसि करे च श्रीपतेर्न्यस्तपाणिम् ।
गलितरणनिरोधैर्बाहुभिर्व्याजजृम्भा-
व्यतिवलितविहारैर्गूढमाश्लिष्टकान्तम् ॥ ५ ॥

विधुतरुषितगन्धैः केवलेन्दोरिवांशैः
शिवमकृशदयार्द्रैर्लोचनांशुप्रचारैः ।
अमरनगरनारीनेत्रसम्भावनीये
विकचकमललीले लोचने लालयन्तम् ॥ ६ ॥

सुरसरिदुरुवीचीमज्जनोन्मज्जनाभ्यां
विलसितशशिलेखोन्मुद्रमे(ध्यी?घ)त्कपर्दम् ।
प्रणयकुपितलक्ष्मीपादपद्मावपीड-
प्रकटपदविभूषालम्बिलीलाकिरीटम् ॥ ७ ॥

स्तुतिरिति गुणलीलावर्णनैकावतारा
तव वरद! गुणोक्तिर्नैव तत्त्वानुबन्धा ।
न खलु निखिलमायामोहदाहव्यतीते
भवति भवति वाचां गोचरः कोऽपि भावः ॥ ८ ॥

अपि तु विकसितं नः पुण्यपाकेन केना-
प्यखिलविषयिदूरं तत्त्वमास्ते पुरस्तात् ।
स्तुतिरपि ननु किं वा सैव मुख्यापि लोके
यदुत गुणगणानां कोऽपि मिथ्याप्रवादः ॥ ९ ॥

तदिह भवतु तावदेव नस्तावकीन-
प्रकटमहिमधीराम्भोधिकल्लोललेशम् ।
निजरुचिपरिकॢप्त्या शंसितु लम्पटानां
सहजसचिवराजस्तावकीनः प्रवादः ॥ १० ।

सृजति जगदशेषं यत्कटाक्षावजृम्भः
प्रमदयति तदेतद्यन्मुखेन्दुप्रसादः ।
हरति च पुनरन्तो यत्कटाक्षान्तरार्धं
जनतु भुवनबीजं तन्(?)सितं चासितं च ॥ ११ ॥

सुकृतिकृतिरशेषा यत्प्रसादे कृतार्था
विपुलविभवलक्ष्मीर्यत्पदाम्भोजरेणुः ।
सुरवरवरनार्यो यत्प्रभावांशलेशो
जयतु भुवनबीजं तत् सितञ्चासितं च ॥ १२ ॥

सकलभुवनवेदो यद्विनोदावतारः
कृशयति निजशार्ङ्गं यत्प्रभाबिम्बगन्धः ।
गलितविविधबन्धो यत्पदप्रौढिभूमा
जयतु भुवनबीजं तत् सितं चासितं च ॥ १३ ॥

रजसि समनुरक्तो यद्विलासैकभाग-
स्तमसि निशिचराभा यद्विमोहैकशक्तिः ।
परिविलसति सत्त्वे यत्प्रबोधाद्भुतश्री-
र्जयतु भुवनबीजं तत् सितं चासितं च ॥ १४ ॥

अचलनियमनिष्ठैरर्च्यते यत्पदाब्जं
मधुरतररसज्ञैर्वर्ण्यते यद्विहारः ।
नहि परमधुनापि प्रेक्ष्यते यत्सतत्त्वं
जयतु भुवनबीजं तत् सितं चासितं च ॥ १२ ॥

मम हुतवहधूमश्यामलं यत्सुतेजो
नियमिहृदयशाणप्रस्फुटा यत्प्रदीप्तिः ।
अचलविमलसौख्याम्भोनिधिर्यत्स्वरूपं
जयतु भुवनबीजं तत् सितं चासितं च ॥ १६ ॥

मनसि निखिलनॄणां यद्वपुः प्रादुरास्ते
सकलभुवनमध्ये यद्वपुर्नैव भाति ।
हरिवरुणयमादिव्याप्तिर्यत्प्रतापो
जयतु भुवनबीजं तत् सितं चासितं च ॥ १७ ॥

प्रकृतिविकृतिरूपैर्गूहितं यन्महत्त्वं
निकृतिरतजनानां दुर्गतं यद्विभुत्वम् ।
सुकृतिहृदयसेवाभाजनं यत्प्रभुत्वं
जयतु भुवनबीजं तत् सितं चासितं च ॥ १८ ॥

वितरति चिरकाराबन्धनं य(द्वि?दुव्यु)पेक्षा
प्रदिशति न च वियासम्पदं यद्व्यपेक्षा ।
विसृजति निजशश्वन्निस्मृतिं यत्समीक्षा
जयतु भुवनबीजं तत् सितं चासितं च ॥ १९ ॥

तृणमपि नहि शक्तं लङ्घितुं यन्नियोगं
मुनिरपि नहि शक्तो वेदितुं यत्प्रयोगम् ।
वयमपि नहि शक्ताः शङ्कितुं यत्सुयोगं
जयतु भुवनबीजं तत् सितं चासितं च ॥ २० ॥

सुरनिकरकिरीटभ्रा(जी?जि) यत्पादपीठं
रुचिभिरनिशमात्मश्लाघि यत्पादपीठम् ।
पुलकितमिव हर्षोत्कर्षि यत्पादपीठं
जयतु भुवनबीजं तत् सितं चासितं च ॥ २१ ॥

निजरससमुपात्ताकारवान् यद्दयाब्धि-
र्निजकरधृतखिद्यत्किङ्करो यद्दयाब्धिः ।
निजजनभवबन्धध्वंसनो यद्दयाब्धि-
र्जयतु भुवनबीजं तत् सितं चासितं च ॥ २२ ॥

कलितभुजगभूषं कौस्तुभोल्लासिवत्सं
कपिलविपुलनेत्रं कम्रकञ्जारुणाक्षम् ।
शशिशकलललामं चारुराजत्करीटं
पदमिदमुदितं नः पातु पुष्टं पुरस्तात् ॥ २३ ॥

सजलजलदनीलं शारदाम्भोदशीलं
कबलितनवनीतं कालकूटानुरागि ।
घुसृणमसृणवेषं घूर्णितोद्भूमिभूषं
शरणमिदमिदं नः शाश्वतं धाम भूयात् ॥ २४ ॥

अहिचलिततरङ्गोत्तुङ्गगङ्गावतंसं
सुमधुरमधुधारासारसूनावतंसम् ।
तिलकशशिकलांशुश्रेणिसञ्चारगौरं
रुचिरविविधरत्नप्रोत्करोद्गारशारम् ॥ २५ ॥

विलसदमरनारीहस्तयन्त्रावमुक्त-
प्रकटकुसुमयन्त्रावर्षधारानुसार ।
प्रबलविपुलभूयोविस्मयाविष्टनृत्य-
न्निखिलसुरजयोक्तिश्रेणिनिर्घूर्णिकर्णम् ॥ २६ ॥

स्मितरसपरिपूरोद्रेकमुद्रातिभद्र-
क्षितिजलधरकन्यालोचनोल्लेहनीयम् ।
अनिशनिनदमानामन्दनिर्हारिभेरी-
भवभरितगभीरापारभाङ्कारभारम् ॥ २७ ॥

इह मयि करुणायाश्चारुनिष्यन्दपूरं
विकचकलकटाक्षैः सर्वतः सन्दधानम् ।
सकलसुकृतपाकोद्रेकतोऽग्रे कृतं नः
परमवतु कृतं नः पूर्णनिर्वाणमेतत् ॥ २८ ॥

स्तोतर्येवं मुनीन्द्रे गुरुतरकरुणासान्द्रमुत्सृष्टभेदं
तत्तत्त्वं प्रादुरास्त प्रतिदिशमभितो धाममात्रं (दधतद)ग्रे ।
भूयोऽपि द्वैतमेव व्यलसदथ मुनिः प्राप्तनिर्वाणमार्गं
मत्वात्मानं प्रमोदव्यतिकरमगदद् गद्गदो भावभेदैः ॥ २९ ॥

अथ प्रयातेष्वखिलेषु नाकिषु
द्वितीयवेषे जलधिं प्रतीपु(षीपि) ।
तस्मिन् पुनः श्वेतवने शिवः स्वयं
लिङ्गात्मना सन्निदधे मुनीच्छया ॥ ३० ॥

नित्याकृत्तविलाससान्द्रमधुरोद्बोधस्ततो लालितो
निस्तृष्णप्रबलप्रभावमहितैरश्व .... वै शुद्धितः ।
रम्यो लीनभवः शिवः सुमनसां चक्रे शमेकः पुरा
राता ज्ञानिमुदो निशेशरचनातोषी स्तुतः साद्रिरा ॥ ३१ ॥

इति श्रीकृष्णलीलाशुकस्य कृतौ कालवधे
तृतीयः सर्गः ।

समाप्तं च काव्यम् ॥